# द्वितीय-सत्रीया परीक्षा
# आदर्शप्रश्नपत्रम्
# (सम्पूर्ण-पाठ्यक्रम-अधिकृत्य)
# 2022-2023
# कक्षा- दशमी
# विषयः संस्कृतम्

**समयः होरात्रयम्** **पूर्णांकाः 50**

## खण्ड - क
## अपठित-अवबोधनम्

**प्रश्न-1. अधोलिखितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

भारतस्य उत्तरे हिमालयः नामगिरिः अस्ति। पुरा हिमगिरौ ऋषीणां आश्रमाः आसन्। एकस्मिन् आश्रमे एकः मुनि: अवसत्। सः आश्रमस्य कुलपतिः आसीत्। तत्र अनेके शिष्याः अपि आसन्। ते मुनिम् अनमन्। ते मुनेः विद्यां अपठन्। ते मुनिना सह भ्रमणाय अगच्छन्। ते मुनये पुष्पाणि फलानि च अनयन्। मुनिः स्नेहेन तेभ्यः शिक्षां अयच्छत्।

**(1) एकपदेन उत्तरत –** **½+½=1**

**(क)** भारतस्य उत्तरे कः नामगिरिः अस्ति?

**(ख)** हिमगिरौ केषाम् आश्रमाः आसन्?

**(2) पूर्णवाक्येन उत्तरत –** **½+½=1**

**(क)** शिष्याः मुनिना सह कुत्र अगच्छन्?

**(ख)** मुनिः आश्रमस्य कः आसीत्?

**(3) निर्देशानुसारम् उत्तरत –** **½+½=1**

**(क)** "अपठन्" इति क्रियापदस्य कर्ता कः?

**(ख)** "हिमगिरौ" इत्यस्मिन् पदे का विभक्तिः?

**प्रश्न-2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

श्री जवाहरलाल नेहरू: महापुरुषः आसीत्। सः देशभक्तः जननायकः च आसीत्। सः बाल्ये उच्च शिक्षायै आङ्गलदेशम् अगच्छत्। सः भारते आगम्य देशसेवायां संलग्नः अभवत्। सः गान्धी

Downloaded from cclchapter.com

महोदयेन चालिते सत्याग्रहे सम्मानितः अभवत् । तदैव सः भारतस्य ग्रामे-ग्रामे अगच्छत्। सः सर्वान् जनान् अबोधयत् येन जना: स्वतन्त्रतायाः प्राप्तये यत्नं कुर्वन्तु। जनाः भारतस्य स्वतन्त्रतायै उद्यताः अभवन् । सः सर्वं सुखम् अत्यजत्। सः बहुवारं कारागारम् अगच्छत्।

**(1) एकपदेन उत्तरत-** **½×1=½**

**(क)** महापुरुषः कः?

**(2) पूर्णवाक्येन उत्तरत-** **½×1=½**

**(क)** जवाहरलाल-नेहरू: उच्च शिक्षायै कुत्र अगच्छत्?

**(3) गद्यांशं पठित्वा तृतीयांशतुल्यं सारं लिखत।** **1×1=1**

**(4) प्रदत्त गद्यांशस्य उचितं शीर्षकं लिखत।** **1×1=1**

**खण्ड - ख**

**रचनात्मक-कार्यम्**

**प्रश्न-3. मञ्जूषातः पदानि विचित्य रिक्तस्थानानि पूरयित्वा स्व-अनुजस्य कृते पत्रं लिखत।**

**½X10=5**

आसी:, सम्मानजनकं, एव, भ्रातः, प्राप्तम्, पितरौ, पठित्वा, कथयामि, अद्य, परीक्षा।

परीक्षा भवनम्

प्रिय: (i)...... रमेशः,

सस्नेहं नमस्कारं (ii)…………..।

मया (iii)………..तव पत्रं (iv)………...। पत्रं (v)……..... महद् दुःखम् जातम्। परीक्षाकाले त्वम् ज्वरग्रस्तः (vi)………….। रुग्णः सन् अपि त्वया (vii)……. दत्ता। परीक्षायां (viii)……...स्थानमपि प्राप्तम्। एतत् तव परिश्रमस्य (ix)……..फलम् । अहं त्वयि गर्वं अनुभवामि। (x)…………….प्रति मम प्रणामः।

भवतः अग्रजः,

रामः।

Downloaded from cclchapter.com

**प्रश्न-4. अधोलिखितेषु विषयेषु एकं विषयम् अधिकृत्य संस्कृत-भाषायां लघुनिबन्धं लिख्यन्ताम्। 5×1=5**

(क) दशहरा (ख) मम प्रियं मित्रम् (ग) हिमाचल-प्रदेश:

**खण्ड - ग**

**अनुप्रयुक्त-व्याकरणम्**

**प्रश्न-5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिविच्छेदपदं वा प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नत्रयम्) 1×3=3**

**(क) प्रपश्यामि ग्राम+अन्ते निर्झर-नदी-पयः पूरम्।**

(1) ग्रामन्ते (2) ग्रामान्ते (3) ग्रामअन्ते (4) ग्रामऽन्ते

**(ख) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।**

(1) शरीर+उपचयः (2) शरीरो+उपचय: (3) शरीर+ओपचयः (4) शरीरोप+चयः

**(ग) जानाम्यहम् तस्य नामधेयम्।**

(1) जानाम्+यहम् (2) जानाम्य+अहम् (4) जानामि+यहम् (4) जानामि+अहम्

**(घ) गुरवः सदा+एव पूजनीयाः।**

(1) सदैव (2) सदेव (3) सदाव (4) सदौव

**प्रश्न-6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नद्वयम्) 1x2=2**

**(क) रामलक्ष्मणौ वनं अगच्छताम्।**

(1) रामः च लक्ष्मणः च (2) रामौ च लक्ष्मणौ च (3) लक्ष्मणौ च रामौ च (4) रामलक्ष्मणः

**(ख) ग्रामस्य समीपे नदी वहति।**

(1) अनुग्रामम् (2) उपग्रामम् (3) ग्रामसमीपे (4) यथाग्रामम्

**(ग) पीताम्बर: वैकुण्ठे वसति।**

(1) पीत: अम्बरः (2) पीताः अम्बराः येन सः

(3) पीताः अम्बराः (3) पीतानि अम्बराणि यस्य सः

Downloaded from cclchapter.com

**प्रश्न-7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं प्रदत्त-विकल्पेभ्यः चिनुत। 1x5=5**

**(क) संसारे अस्मिन् सर्वेषां महत्त्वं विद्यते।**

(1) महत्+त्व (2) महत्+त्वम् (3) महा+त्वम् (4) महत्+क्त

**(ख) परिश्रमेण छात्राः ज्ञान+मतुप् भवन्ति।**

(1) ज्ञानवान् (2) ज्ञानवन्तौ

(3) ज्ञानवन्तः (4) ज्ञानवानाः

**(ग) नमन्ति फलिनो वृक्षाः।**

(1) फल+नो (2) फल+इन् (3) फलि+नो (4) फल+इनो

**(घ) सा समाजस्य सेविका अस्ति।**

(1) सेविक+टाप् (2) सेवा+तल् (3) सेवक+तल् (4) सेवक+टाप्

**(ङ) अत्र धर्म+ठक् उत्सवः अस्ति।**

(1) धार्मिकः (2) धार्मिकम्

(3) धार्मिकाः (4) धार्मिकी

**प्रश्न-8. अधोलिखितवाक्येषु वाच्यस्य नियमानुगुणं समुचितं विकल्पं प्रदत्त-विकल्पेभ्यः चिनुत। (केवलं प्रश्नत्रयम्) 1×3=3**

**(क) रमा भोजनं पचति।**

(1) रमा भोजनं पच्यते (2) रमया भोजनं पच्यते (3) रमया भोजनः पच्यते (4) रमया भोजनं पचति

**(ख) तेन ग्रामः गम्यते।**

(1) सः ग्रामं गमति (2) सा ग्रामं गच्छति (3) सः ग्रामः गच्छति (4) सः ग्रामं गच्छति

**(ग) त्वं किं करोषि?**

(1) त्वया किं क्रियते? (2) त्वया किं करोषि? (3) त्वम् किं क्रियते? (4) त्वम् किं करोषि?

**(घ) मया पठ्यते।**

(1) अहम् पठ्यते (2) अहम् पठसि (3) अहम् पाठ्यामि (4) अहम् पठामि

**प्रश्न-9. अधोलिखित-वाक्येषु लिङ्गाधारित-सङ्ख्या-वाचक-पदानि प्रदत्तेभ्यः विकल्पेभ्यः चिनुत। 1×4=4**

**(क) तस्य.......... कन्ये स्तः।**

(1) द्वौ (2) द्वे (3) द्वि (4) द्वा

Downloaded from cclchapter.com

**(ख) भगवतः शिवस्य……….. नेत्राणि सन्ति।**

(1) त्रीणि (2) त्रयः (3) तिस्रः (4) त्रीन्

**(ग) अश्वस्य………. पादाः सन्ति।**

(1) चत्वाराः (2) चतस्रः (3) चत्वारि (4) चत्वारः

**(घ) पाण्डवाः……….. आसन्।**

(1) पञ्चानि (2) पञ्चाः (3) पञ्च (4) पञ्चमः

**प्रश्न-10. यथानिर्दिष्ट-शब्दानां समुचितं पदपरिचयं प्रदत्तेभ्यः विकल्पेभ्यः चिनुत।**

**(केवलं प्रश्नत्रयम्) 1X3 = 3**

**(क) रामयोः इत्यस्य पद-परिचयम्-**

(1) राम शब्दः, प्रथमा विभक्तिः, द्विवचनम्। (2) राम शब्दः, षष्ठी विभक्तिः, द्विवचनम्।

(3) राम शब्दः, द्वितीया विभक्तिः, द्विवचनम्। (4) राम शब्दः, तृतीया विभक्तिः, द्विवचनम्।

**(ख) वयम् इत्यस्य पद-परिचयम्-**

(1) अस्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्। (2) युष्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्।

(3) अस्मद् शब्दः, द्वितीया विभक्तिः, बहुवचनम्। (4) युष्मद् शब्दः, प्रथमा विभक्तिः, बहुवचनम्।

**(ग) मुनिना इत्यस्य पद-परिचयम्-**

(1) मुनि शब्दः, प्रथमा विभक्तिः, बहुवचनम्। (2) मुनि शब्दः, द्वितीया विभक्तिः, बहुवचनम्।

(3) मुनि शब्दः, तृतीया विभक्तिः, एकवचनम्। (4) मुनि शब्दः, पञ्चमी विभक्तिः, एकवचनम्।

**(घ) मालायाम् इत्यस्य पद-परिचयम्-**

(1) माला शब्दः, द्वितीया विभक्तिः, बहुवचनम्। (2) माला शब्दः, द्वितीया विभक्तिः, एकवचनम्।

(3) माला शब्दः, पञ्चमी विभक्तिः, एकवचनम्। (4) माला शब्दः, सप्तमी विभक्तिः, एकवचनम्।

## खण्ड- घ
## पठित-अवबोधनम्

**प्रश्न-11. पठित-गद्य-पद्य-आधारित-अवबोधनकार्यम्-**

**(अ) अधोलिखित-पठितम् अनुच्छेदम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

Downloaded from cclchapter.com

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत्। अगृहणाच्च, परं विचित्रमघटत्। चौरः एव उच्चैः क्रोशितुमारभत " चौरोऽयं चौरोऽयं" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाभर्त्सयन्।

**(1) एकपदेन उत्तरत –** **½+½=1**

**(क)** कीदृशी दैवगतिः?

**(ख)** कः उच्चैः क्रोशितुमारभत?

**(2) पूर्णवाक्येन उत्तरत –** **½+½=1**

**(क)** चौरः उच्चैः किं क्रोशितुमारभत?

**(ख)** अतिथिः केन प्रबुद्धः?

**(3) निर्देशानुसारम् उत्तरत –** **½+½=1**

**(क)** "विचित्रा दैवगतिः" इत्यत्र विशेषण-पदं किम्?

**(ख)** "निष्क्रम्य" इत्यत्र प्रकृति-प्रत्ययं पृथक् कुरुत।

**(आ) अधोलिखितम् पद्यांशम् अधिकृत्य निर्देशित-प्रश्नानाम् उत्तराणि दीयन्ताम्।**

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

**(1) एकपदेन उत्तरत –** **½+½=1**

**(क)** पिता कस्मै यच्छति?

**(ख)** बाल्ये पिता पुत्राय किं यच्छति?

**(2) पूर्णवाक्येन उत्तरत –** **½+½=1**

**(क)** पिता पुत्राय कदा विद्याधनं यच्छति?

**(ख)** कः पुत्राय विद्याधनं यच्छति?

**(3) निर्देशानुसारम् उत्तरत –** **½+½=1**

**(क)** "शैशवे" इति पदस्य अत्र समानार्थक-पदं किम्?

**(ख)** "विद्याधनं महत्" इत्यत्र विशेष्यपदं किम्?

**प्रश्न-12. पठित-गद्य-पद्ययोः हिन्दी-भाषायाम् अनुवादः।**

**(अ) अधोलिखित-गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्।** **2×1=2**

Downloaded from cclchapter.com

**(क)** अरे! अरे! मां विहाय कथमन्य: कोऽपि राजा भवितुमर्हति अहं तु शीतले जले बहुकालपर्यन्तम् अविचल: ध्यानमग्न: स्थितप्रज्ञ: इव स्थित्वा सर्वेषां रक्षाया: उपायान् चिन्तयिष्यामि, योजनां निर्माय च स्वसभायां विविधपदमलंकुर्वाणै: जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि अतः अहमेव वनराजपदप्राप्तये योग्य: इति।

**(ख)** ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायत इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादिसञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति। धूमभस्मावृतं जायते तदा गगनम्। सेल्सियश-ताप-मात्राया अष्टशताङ्कतामुपगतोऽयं लावारसो यदा नदीवेगेन प्रवहति तदा पार्श्वस्थग्रामा नगराणि वा तदुदरे क्षणेनैव समाविशन्ति।

**(आ) अधोलिखित-पद्यांशयोः कस्यचिद् एकस्य पद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम्। 2×1=2**

**(क)** आश्वास्य पर्वतकुलं तपनोष्णतप्तमुद्दामदावविधुराणि च काननानि।
नानानदीनदशतानि च पूरयित्वा रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।।

**(ख)** विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।

**प्रश्न -13. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्) ½×4=2**

**(क)** चातकः **<u>वने</u>** वसति।

**(ख)** मालाकारः **<u>तोयैः</u>** तरोः पुष्टिं करोति।

**(ग)** **<u>शिविना</u>** विना इदं दुष्करं कार्यं कः कुर्यात्।

**(घ)** **<u>एतादृशी</u>** भयावहघटना गढवालक्षेत्रे घटिता।

**(ङ)** करुणापरो गृही **<u>तस्मै</u>** आश्रयं प्रायच्छत्।

**प्रश्न-14. अधोलिखित-समानार्थक-पदानाम् उचित-मेलनं कुरुत। ½×4= 2**

| | |
|---|---|
| **(क)** पर्याकुलम् | नष्टाः |
| **(ख)** विशीर्णा: | क्रोधायुक्ताम् |
| **(ग)** प्रकुपिताम् | सन्त्रोट्य |
| **(घ)** विदार्य | व्याकुलम् |

Downloaded from cclchapter.com

## प्रश्ननिर्माणकर्तारौ अशुद्धिसंशोधकौ

**(1)** नरेश मलोटिया

संस्कृत अध्यापक

राजकीय-आदर्श-कन्या-वरिष्ठ-माध्यमिक-विद्यालय-नादौनः,

डाकगृहम्- नादौनः, मण्डलम्- नादौनः, जनपदः - हमीरपुरः

(हिमाचल-प्रदेशः)- 177033

दूरवाणी-सङ्केतः - 9817707260, 8351007260

अणु-सङ्केतः - nareshmalotia087@gmail.com

**(2)** डॉ. नरेन्द्र राणा

संस्कृत अध्यापक

राजकीय-उच्च-विद्यालय-धारः

डाकगृहम्- कोटी उतरोऊ, मण्डलम्- शिलाई, जनपदः - सिरमौरः

(हिमाचल-प्रदेशः)- 173029

दूरवाणी-सङ्केतः - 8894136386,

अणु-सङ्केतः – rananarender319@gmail.com

Himachal Pradesh
Board of School Education
Dharamshala, Himachal Pradesh

Downloaded from cclchapter.com